तदा नियममास्थाय माधवे माधवं भज ॥
राज्यभोगांश्च विपुलान् पुत्त्रमित्रादिसम्पदम् ।
यदिच्छसि तदा विष्णोः प्रियं माधवमाचर ।
त्यक्तुमिच्छसि राजेन्द्र जन्ममृत्युजरादिकम् ।
भयं यदि तदा विष्णोः प्रियं माधवमाचर ॥
येर्नाचरितो मासो माधवः पापबुद्धिभिः ।
नरकान्न निवर्त्तन्ते दग्धाः कोपाग्निना हरेः ॥
न वैशाखसमो मासो विशेषः केशवप्रियः ।
अव्रतेन क्षिपेद्यस्तु तं विद्याद्विकषात्मज ॥
यतिश्च विधवा चैव विशेषेण वनाश्रमी ।
वैशाखे नरकं याति ह्यकृत्वा नियमं नरः ॥
तस्माद्राजन् प्रयत्नेन कुरु त्वं माधवव्रतम् ।
यस्याचरणमात्रेण हरिस्तुष्टो भविष्यति ॥
तावद्गर्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले ।
यावन्नायाति राजेन्द्र माधवो माधवप्रियः ॥
अणुमात्रन्तु यत्किञ्चिद्दत्तो ददाति च माधवे ।
काले वा यदि वाकाले कोटिकोटिगुणं भवेत् ॥
यथोदधीनां राजर्षे ! क्षयो नैवोपपद्यते ।
तथैव माधवे मासि न क्षयं पापपुण्ययोः ॥
नाचारि धर्म्माचरणेन माधवं
नाराधितो यैः पुरुषप्रधानः ।
येर्न श्रुता भूप कथा मुरारे-
स्तेषां वृथा जन्म नराधमानाम् ॥
न पीडयन्ति ग्रहराक्षसा गणा
यक्षाः पिशाचोरगभूतदानवाः ।
यो माधवे मासि नरेन्द्रवर्य
भुवं मुरारेर्व्रतमाचरन्ति ह ॥”
इति पाद्मोत्तरखण्डे वैशाखमाहात्म्यकथने १६८ अध्यायः ॥

वैशाखी, स्त्री, ( विशाखया युक्ता पौर्णमासी । “नक्षत्रेण युक्तः कालः ।” ४ । २ । ३ । इत्यण् । ततो ङीप् ।) वैशाखमासस्य पूर्णिमा । यथा,
“विशाखातारकायुक्ता वैशाखी पूर्णिमा
भवेत् ।”
इति शब्दरत्नावली ॥
तत्र तर्पणफलम् । वैशाखीमुपक्रम्य यमः ।
“गौरान् वा यदि वा कृष्णान् तिलान् क्षौद्रेण
संयुतान् ।
प्रीयतां धर्म्मराजेति पितॄन् देवांश्च तर्पयेत् ॥
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ।
अब्दायुतञ्च तिष्ठेत्तु स्वर्गलोके न संशयः ॥”
इति तिथ्यादितत्त्वम् ॥ * ॥
रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ (वसुदेवस्य स्त्रीणामन्यतमा । यथा, हरिवंशे । ३५ । २ ।
“वैशाखी च तथा भद्रा सुनामा चैव
पञ्चमा ॥”)

वैशिकः, पुं, ( वेशेन जीवतीति । वेश + “वेतनादिभ्यो जीवति ।” ४ । ४ । १२ । इति ठक् । ) त्रिविधनायकान्तर्गतनायकविशेषः । यथा,—
शृङ्गारस्य उभयसाध्यत्वान्नायकोऽपि निरूप्यते ।
स च त्रिविधः । पतिरुपपतिर्वैशिकश्च । बहुवेश्याभोगोपरसिको वैशिकः । यथा,—
“काञ्चीकलक्वणितकोमलनाभिकान्तिं
पारावतध्वनिविचित्रितकण्ठपालिम् ।
उद्भ्रान्तलोचनचकोरमनङ्गरङ्ग-
माशास्महे कमपि वारविलासवत्याः ॥” * ॥
वैशिकस्तूत्तममध्यमाधमभेदात् त्रिविधः । दयितास्वमप्रकोपे अपि उपचारपरायणः उत्तमः ।
यथा,—
“चक्षुःप्रान्तमुदीक्ष्य पद्मनयनः शोणारविन्द-
श्रियं
नोच्चैर्जल्पति न स्मितं वितनुते गृह्णाति वीटीं
न वा ।
तल्पोपान्तमुपेत्य किन्तु पुलकभ्राजत्कपोलद्युतिः
कान्तः केवलमानतेन शिरसा सक्तासनं
गुम्फति ॥” * ॥
प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः ।
यथा,—
“आस्यं यद्यपि हास्यवर्ज्जितमिदं लास्येन हीनं
वचो
नेत्रं शोणसरोजकान्तिरुचिरे क्वापि क्षणं
क्षीयते ।
मालायाः करणोद्यमो न कविकारम्भः कुचाम्भोजयो-
र्धूपः कुन्तलधोरणीषु सुतनोः सायन्तनो
दृश्यते ॥” * ॥
भयलज्जापालज्याशून्यः कामक्रीडायामकृतकृत्याकृत्यविचारोऽधमः । यथा,—
“उदयति हृदि नैव यस्य लज्जा
न च करुणा न च कोऽपि भीतिलेशः ।
वकुलमुकुलकोषकोमलां मां
पुनरपि तस्य करेण घातयेथाः ॥” * ॥
मानी चतुरः शठ एवान्तर्भवति । मानी यथा,
“वाञ्छाकूतपरायणं तव वचो वज्रोपमेयं मनः
श्रुत्वा वाचमिमामपास्य विनयं व्याजाद्दृशः
प्रस्थिते ।
प्रातर्व्वक्त्रविलोकने परिहृतालापे विवृत्तानने
प्राणेशे नियतं पतन्ति कृपया वामभ्रुवो
दृष्टयः ॥”
वाक्चेष्टाव्यङ्ग्यसमागमचतुरः । वचनव्यङ्ग्यसमागमो यथा,—
“तमोजटाले हरिदन्तराले
काले निशायास्तव निर्गतायाः ।
तटे नदीनां निकटे वनानां
घटेत शातोदरि ! कः सहायः ॥”
चेष्टाव्यङ्ग्यसमागमो यथा,—
“कान्ते कनकजम्बीरं करे कमपि कुर्व्वति ।
अगारलिखिते भानौ बिन्दुमिन्दुमुखी ददौ ॥”
इति रसमञ्जरी ॥
( वेशसम्बन्धिनि, त्रि । यथा, मृच्छकटिके । १ अङ्के ।
“ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं
हस्तिशिक्षां
ज्ञात्वा शर्व्वप्रासादात् व्यपगततिमिरे चक्षुषी
चोपलभ्य ॥”)

वैशिष्ट्यं, क्ली, ( विशिष्टस्य भावः । ) विशिष्टत्वम् ।
तत्तु सम्बन्धपदार्थः । विशिष्टधीनियामक इति यावत् । यथा । “विशिष्टवैशिष्ट्याद्यभ्युपगमवादः ।” इति शिरोमणिः ॥ दण्डसंयोगवान् इति शाब्दबोधो न विशिष्टवैशिष्ट्यावगाही । स्वले कपोतन्यायेनैव तत्स्वीकारात् । इति भावः । इति जागदीशी सामान्यलक्षणा ॥ * ॥ (असाधारणत्वम् । यथा, महाभारते । १३ । १५६ । ४१ ।
“त्रिषु लोकेषु तावच्च वैशिष्ट्यं प्रतिपत्स्यसे ।
सुप्रियः सर्व्वलोकस्य भविष्यसि जनार्द्दन ॥”)

वैशेषिकः, पुं, (विशेषं वेत्ति अधीते वा । विशेष + ठक् । ) कणादमुनिकृतदर्शनशास्त्रवेत्ता । तत्पर्य्यायः । औलुक्यः २ । इति हेमचन्द्रः ॥ (विशेषमधिकृत्य कृतो ग्रन्थः । विशेष + “अधिकृत्य कृते ग्रन्थे ।” ४ । ३ । ८७ । इति ठक् । ) कणादमुनिकृतदर्शनशास्त्रविशेषः । स तु विशेषपदार्थनिरूपकग्रन्थः । अस्य मतं न्यायदर्शनमततुल्यम् । अत्र जगतः कारणं परमाणुपर्य्यन्तं निरूपितम् ॥ * ॥ इह खलु निखिलप्रेक्षावन्निसर्गप्रतिकूलवेदनीयतया निखिलात्मसंवेदनसिद्धं दुःखं जिहासतस्तद्धानोपायं जिज्ञासुः परमेश्वरसाक्षात्कारमुपायमाकलयति ।
“यदा चर्म्मवदाकाशं वेष्टयन्तीह मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥”
इत्यादिवचननिचयप्रामाण्यात् । परमेश्वरस्य साक्षात्कारश्च श्रवणमननभावनाभिर्भावनीयः ।
यदाह ।
“आगमेनानुमानेन ध्यानाभ्यासबलेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥”
इति ॥
तत्र मननमनुमानाधीनम् । अनुमानञ्च व्याप्तिज्ञानाधीनम् । व्याप्तिज्ञानञ्च पदार्थविवेकसापेक्षम् । अतः पदार्थषट्कम् “अथातो धर्म्मं व्याख्यास्यामः ।” इत्यादिकायां दशलक्षण्यां कणभक्षेण भगवता व्यवस्थापि । तत्राह्निकद्वयात्मके प्रथमेऽध्याये समवेताशेषपदार्थकथनमकारि । तत्रापि प्रथमाह्निके जातिमन्निरूपणम् ।
द्वितीयाह्निके जातिविशेषयोर्निरूपणम् ।
आह्निकद्वयात्मके द्वितीये भूतदिक्काललक्षणम् ।
तत्रापि प्रथमाह्निके भूतविशेषलक्षणम् । द्वितीये दिक्कालप्रतिपादनम् । आह्निकद्वयात्मके तृतीये आत्मान्तःकरणलक्षणम् । तत्राप्यात्मलक्षणं प्रथमे । द्वितीये अन्तःकरणलक्षणम् । आह्निकद्वययुक्ते चतुर्थे शरीरतदुपयोगिविवेचनम् ।
तत्रापि प्रथमे तदुपयोगिविवेचनम् । द्वितीये शरीरविवेचनम् । आह्निकद्वयवति पञ्चमे कर्म्मप्रतिपादनम् । तत्रापि प्रथमे शरीरसम्बन्धिकर्म्मचिन्तनम् । आह्निकद्वयशालिनि षष्ठे श्रौतधर्म्मनिरूपणम् । तत्रापि प्रथमे दानप्रति-